# "आचार्यराजशेखरस्य शब्दानुशासनम्"

**कमलाप्रसाद पाण्डेयः**

आचार्यराजशेखरस्य यादक् काव्यशास्त्रीयं पाण्डित्यं वर्तते तादग् व्याकरणशास्त्रीयमप्यस्ति। काव्यमीमांसायामेवानेन कविना व्याकरण–शास्त्रीयसिद्धान्तानां प्रतिपादनं कतम्। पाणिनीयव्याकरणे पदसंज्ञाविधाय–कानि प चसूत्राणि सन्ति। यथा–

(१.) सुप्तिङ्न्तं पदम् (अष्टाध्यायी १/४/१७)

(२.) नः क्ये (अष्टा.१/४/१५)

(३.) सिति च (अष्टा. १/४/१६)

(४.) स्वादिष्वसर्वनामस्थाने (अष्टा. १/४/१७)

(५.) अयस्यपादीनिच्छन्दसि (अष्टा. १/४/२०)

एतेषां सूत्राणां क्रमशो र्थो वर्तते–

(१.) सुबन्तं तिङ्न्तं च शब्दरूपं पदसंज्ञं भवति।

(२.) नान्तं शब्दरूपं क्ये परतः पदसंज्ञं भवति।

(३.) सिति प्रत्यये पूर्वं पदसंज्ञं भवति।

(४.) कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।

(५.) अयस्ययादीनि शब्दरूपाणि छन्दसि विषये साधूनि भवन्ति (अर्थात् वेदे कुत्रचिद् भसंज्ञा, कुत्रचित् पदसंज्ञा, कुत्रचिदुभे संज्ञे भवतः)।

एतेषां सूत्राणां क्रमश उदाहरणानि सन्ति–

(१.) हरिं वन्दे, मधु सि चति।

(२.) राजीयति।

(३.) भवदीयः।

(४.) राजभ्याम्।

(५.) "स सुष्टुभा स ऋक्वता गणेन।

कविवरराजशेखरः कथयति– "व्याकरणकस्मतिनिर्णितः शब्दो निरुक्तनिघण्ट्वादिभिनिर्दिष्टस्तदभिधेयो र्थस्तौ पदम्। (अर्थात अर्थवान् शब्दः पदम्)। अर्थवान् शब्दः पदम्" इति पदसंज्ञायाः परिभाषा समीचीना न प्रतीयते। यतो हि केवलमर्थवच्छब्दस्य प्रयोगो न भवति। कथितमपि यत्– "अपदं न प्रयु जीत्", अपि तु सुबन्तस्य तिङ्गन्तस्य च शब्दरूपस्य पदसंज्ञा भवति। अर्थात् सुबन्तरूपस्य तिङ्गन्तरूपस्य च शब्दरूपस्य प्रयोगो भवति, न त्वर्थवच्छब्दरूपस्य। "राजीयति" इत्याद्युदाहरणविषये पि स मौनो वर्तते।

एवमेवाचार्यराजशेखरः कथयति शब्दार्थमयस्य शब्दस्य प चवत्तयो भवन्ति। यथा–"तस्य प च वत्तयः सुब्वत्तिः, समासवत्तिः, तद्धितवत्तिः, कद्‌वत्तिः, तिङ्‌वत्तिश्च।" "समर्थः पदविधिः (अष्टा. २/१/१) इति सूत्रे महाभाष्यकारो महर्षिपत जलिः कथयति यत् परार्थाभिधानं वत्तिः।" भट्‌टोजिदीक्षितैः प चवत्तयः स्वीक्रियन्ते। ताः सन्ति कत्तद्धितसमासैकशेष–सनाद्यन्तधातुरूपाः। वैयाकरणसिद्धान्तकौमुद्यां वर्तते– "कत्तद्धितसमासैक–शेषसनाद्यन्तधातुरूपाः प चवत्तयः" (वै.सि.कौ., प. ६२६)।

अत्रेदमवधेयम्– कदन्ताः, तद्धितधटिताः समासाः, एकशेषाः, सनादिप्रत्ययान्तधातवश्चेति वत्तयः प चविधाः। विग्रहवाक्यावयवपदार्थेभ्यः परो न्यो यो यं विशिष्टैकार्थः तत्प्रतिपादिका वत्तिर्भवति। प्रक्रियादशायां प्रत्येकमर्थवत्त्वेन प्रथमविगहीतानां पदानां समुदायशक्त्या विशिष्टकार्यप्रतिपादिका सा भवति। "समर्थः पदविधि" इति परिभाषासूत्रेण समुदायशक्तिर्लभ्या वर्तते। तत्र समासतद्धितयोः पदविधित्वं स्पष्टमेव, "सुप्सुपा" इत्यनुवर्त्य (अर्थात "सुबामन्त्रिते पराङ्गवत्सरे" अष्टा. २/१/२ इत्यतः सुबित्यनुवर्त्य तथा च "सहसुपा" (अष्टा. २/१/४) इत्यतः सुपेत्यनुवर्त्य समासविधानात् तथा च सुबन्तादेव तद्धितोत्पन्ति– विधानात्। कतामपि केषा चित "कर्मण्यण्" (अष्टा. ३/२/१) इत्युपपदनिमित्तकानां पदविधित्वमस्त्येव। "सुप आत्मनः क्यच्" (अष्टा. ३/१/८) इत्यादिसूत्रेण विहितानां क्यजादिसनादिप्रत्ययानामपि पदविधित्वमस्त्येव। एकशेषविधावपि द्वन्द्वे इत्यनुवत्तेर्द्वन्द्वविषये तद्विधानादेकार्थीभावो स्त्येव। "समर्थः पदविधिः" इति सूत्रे भाष्ये विशदीकतं यद् वत्तावेव समुदायशक्त्या विशिष्टैकार्थ–प्रतिपादकता, न तु वाक्ये। तथापि समासवत्तियोग्यविभक्त्यन्तपदानां पथक् प्रयुज्यमानानां समूहो विग्रहवाक्यमिति बोध्यम्।

आचार्यराजशेखरः सुब्वत्तिं पथक् स्वीकरोति। स हि कथयति यत्–सुब्वत्तिर्जातिगुणक्रियाद्रव्यासत्त्वभेदेन प चधा भवति। सा हि वाङ्मयस्य माता वर्तते। उक्तं काव्यमीमांसायाम्– "सेयं सुब्वत्तिः प चतय्यपि वाङ्मयस्य माता" इति विद्वांसः। पुनः काव्यमीमांसाकारः कथयति– "सुब्वत्तिरेवसमासवत्तिः (का. मी., प. ४८)। पूर्वं राजशेखरः सुब्वत्तिं पथक् समासवत्ति च पथक् स्वीकतवान्। अनन्तरं तयोरेकत्वं प्रतिपादितवान्। पुनस्तयोर्भेदहेतू कथयति यत्– "व्यासससमासावेवानयोर्भेदहेतू।" अत्र प्रतीयते यद् राजशेखराय यदा यद रोचते तदा तदेव प्रतिपादयति।

समासप्रतिपादनप्रसङ्गे काव्यमीमांसाकारः कथयति यत् "सा च (समासवत्तिः) षोढा द्वन्द्वादिभेदेन।" तेन श्लोको पि समुद्धतः–

**"द्वन्द्वो स्मि द्विगुरस्मि च गेहे च मे सततमव्ययीभावः।**
**तत्पुरुष कर्मधारय येनाहं स्यां बहुब्रीहि।।**

गायने श्लोको यं रुचिकरः प्रतीयते। बालानां कते षोढा समासो पि सुष्ठुतरः। किन्तु जानन्त्येव विद्वांसो यद् द्विगुकर्मधारयौ तत्पुरुषभेदौ। यतो हि तत्पुरुषाधिकार तौ स्तः।

एवमेव तद्धितवत्तिप्रतिपादनप्रसङ्गे राजशेखरः कथयति यत्– "तद्धितवत्तिः पुनरनन्तता। तद्धि शास्त्रप्रायोवाद यदुत तद्धितमूढाः पाणिनीयाः (का. मी. प. ४८) आचार्य– राजशेखरं पच्छाम्यहं यदि पाणिनीयाः सन्ति तदा कथं ते तद्धितमूढाः। यदि पुनस्तद्धितमूढाः कथं ते पाणिनीयाः। अपर च कथं तद्धितवत्तावेवानन्तता। यद्यनन्तता वर्तते तदा सर्वासु वत्तिसु न केवलं तद्धितवत्तिसु। अतः पूर्वमेव मयोक्तं यद् राजशेखराय रोचते तदेव कथयति सः।

एवमेव कद्वत्तितिङ्गवत्ती अपि तेन प्रतिपादिते, तत्रापि बहु वक्तव्यमस्ति। "तन्न वाक्यं दशधा" इत्यपि तेन प्रतिपादितम्। किन्तु विस्तारभयादन्यत् किमपि न प्रतिपादयामि।।

*भूतपूर्वसंस्कतविभागाध्यक्षः*
*सी.एम.दुबे स्नातकोत्तर महाविद्यालयः*
*बिलासपुरम् (छ.ग.)*

–––ooo–––